VI. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। (5×2=10)

अस्मिन् संसारे सर्वे जीविनः सुखप्राप्तये उद्योगशीलाः दृश्यन्ते। उद्योगिनो मनुष्याः धनं प्राप्य सुखं लभन्ते। उद्योगेन एव धनवन्तः भवन्ति। उद्योगः प्राणिनां नियतो धर्मः उद्योगेनैव असम्भवान्यपि सम्भवन्ति, दुःसाध्यानि अपि सुसाध्यानि भवन्ति। उद्योगेनैव सर्वं फलति देवा अपि उद्योगिनः साहाय्यं कुर्वन्ति। निरूद्योगिनः राष्ट्रस्य घातकाः भवन्ति। श्रीकृष्णः अपि कर्मयोगे बोधयति कुत्रापि कर्माणि विना जीवनं साफल्यं न भवति। राष्ट्रस्य समुन्नतिः उद्योगेनैव जायते।

प्रश्नाः

1) कीदृशाः मनुष्याः सुखं लभन्ते?
2) उद्योगेन कानि कानि सुसाध्यानि भवन्ति?
3) देवाः कस्य साहाय्यं कुर्वन्ति?
4) श्रीकृष्णः किं बोधयति?
5) राष्ट्रस्य समुन्नतिः केन जायते?

---